Shodhshauryam, International Scientific Refereed Research Journal
© 2019 SHISRRJ | Volume 2 | Issue 3 | ISSN : 2581- 6306

# संस्कृतपत्रकारितायाः स्वातन्त्र्यान्दोलने योगदानम्



डॉ. विभाष चन्द्र
प्रशिक्षित स्नातक शिक्षक
केन्द्रीय विद्यालय क्रम सं.- 2, गया

**शोध सार –** साहित्यस्य विविधासु विधासु सर्वथाऽभिनवा भव्या नव्या च विधा पत्रकारिता अस्ति। आन्दोलनमिवेदं मुद्रणस्य यदान्दोलयति दिवानिशं निखिलं जनमानसम्। अनुशास्ति प्रशास्ति चेयं लोकमानसम्। अविस्मरणीयमस्ति योगदानं स्वातंत्र्यान्दोलनाय संस्कृतपत्रकारितायाः। 'वन्दे मातरम्', 'न दैन्यं न पलायनम्' सदृशा नादा अपि संस्कृतपत्रिकाभिरेव दिग्-दिगन्तरं नीताः।

**मुख्य शब्द** - संस्कृत, पत्रकारिता, स्वातन्त्र्यान्दोलन, योगदानम्।

साहित्यस्य विविधासु विधासु सर्वथाऽभिनवा भव्या नव्या च विधा पत्रकारिता अस्ति। आन्दोलनमिवेदं मुद्रणस्य यदान्दोलयति दिवानिशं निखिलं जनमानसम्। मुद्रणस्य महनीयेनैव माहात्म्येनेयं विधा लोके 'प्रेस' इति नाम्नापि प्रथते। लोकसञ्चारस्य जीवन्तं साधनमिदं 'मीडिया' इत्यन्वर्थसंज्ञां भजते।

शब्दबाणो कियद् गौरवं गीतं शास्त्रेष्विति को न वेत्ति। अजस्रमस्ति शब्दब्रह्मणो वर्चसम्। ज्योतिषां ज्योतिस्तु शब्दज्योतिरेव यथोक्तमस्माकमाचार्येण –

**इदमन्धं तमः कृत्स्नं जायेत भुवनत्रयम्।**

**यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्यते ।।**[1]

आचार्यस्य वनचमिदमनुदिनं सर्वथान्वर्थयतीवाद्य पत्रकारिता। अनयैव नीता वाग्ब्रह्मणः परमा प्रतिष्ठा। अस्यामेव दृश्यते तस्य परमश्चरमश्चोत्कर्षः। तामन्तरा त्वद्य निखिलपि जगतीतलं निष्क्रियं निश्चेष्टं तिमिराच्छन्नं च स्यादिति न संशयः। अनुशास्ति प्रशास्ति चेयं लोकमानसम्। यथोक्तं प्रसिद्धेन समीक्षकेण कार्लाइलमहोदयेन - अहो! प्रशस्यते सर्वथा पत्रकारिता। मथ्नाति या लोकमानसम् । हृदयमनुशास्ति । बुद्धिं व्यावृणोति । चेतनां च तनोति । पत्रकृदस्ति प्रशासको विश्वस्यापि विश्वस्य।

मुद्रणं नाम लोकसञ्चारक्रान्तिः । पत्रकारिता च तस्य सद्यः सन्निहितं फलम् । मुद्रणं तावदुन्मुद्रयति लोकनिद्राम्। अधिकारं निर्दिशति। कर्तव्यमुपदिशति । अन्यायमशुभमनिष्टं च निवारयितुं यतते । यथैकस्मिन्नवसरेऽस्माकं पूर्वप्रधानमंत्रिणा नेहरूमहाभागेनैकं सम्पादकसम्मेलनं सम्बोधता कथितमासीत् – समाजे यत्किमप्यहितकरमनिष्टं च तन्निवारणस्योपक्रमः एवं पत्रकृतां पावनो धर्मः। न तैः केवला उन्नता समुज्ज्वला च सामाजिकी चेतनैव समुद्दीपनीयाऽपितु सामान्यजीवने सामाजिकव्यवहारोऽपि उपदेष्टव्यः।

पत्रकारिता खलु लोकस्वातन्त्र्यस्यापरः पर्यायः। यदि स्वातन्त्र्यं हि प्रत्येकस्य समाजस्य जातेर्वा जन्मसिद्धोऽधिकारस्तर्हि पत्रकारिता नाम तस्य समाजस्य मुखम्। विचारस्वातन्त्र्यमेव स्वतन्त्रतायाः संलक्षणम्। तस्य च प्रमाणं पत्रकारिता। यदि कोऽपि समाजः जातिर्वा कापि नार्हति स्वातंत्र्यम् वहति च पारतन्त्र्यपीडां तर्हि तस्य मुक्तेः सशक्तं समर्थं च साधनमपि पत्रकारितैव। संस्कृतस्य पत्रकारिता तस्य ज्वलन्तं निदर्शनम्। वस्तुतः स्वातंत्र्यस्यान्दोलनं संस्कृतपत्रकारिता च न मिथो भिद्येते। एकमपरस्य पूरकम्। पारतंत्र्य-दलनाय जनमानसमान्दोलयितुं प्रभवति संस्कृतपत्रकारिता। घनान्धकारे दीपदर्शनमिव करोति सा। रागद्वेषम् निशारयति। अज्ञानमोहं नाशयति। जडवादं ग्लापयति। नवचेतना चोन्मीलयति। यथोक्तं सूर्योदयसन्दर्भे –

**रागद्वेषनिशारणं विधुरयन् मोहं तमो नाशयन्,**

**तामिस्त्रजवादकैरवकुलं ज्ञानविज्ञानं ग्लापयन् ।**

**विद्वल्लोकमशोकयन् नयसुधीरोलम्बमुन्मीलयन् ।**

**संजातः सुमनो मनो मधुरयन् सर्वत्र सूर्योदयः ॥**[2]

स्वाभिमानं स्वालम्बनं च स्रोतं स्वरूपमेव च स्वातंत्र्यस्येति भृशं स्मारयति संस्कृतस्य पत्रकारिता। स्वाभिमानावधानाय सा भारतीयान् भर्त्सयति गर्हयतिं तर्जयति ततश्चोद्बोधयति । स्मरणीयमत्र वचः पत्रकारिताकाननकेसरिणां श्रीमतामप्पाशास्त्रिणां यच्चमत्करोति संस्कृतचन्द्रिकाम् । यथा-धिक्कष्टम्। परिपाको भारतीयानां दुर्भाग्यधेयस्य। केनापि भागधेयहतकस्य विलासितेन नियंत्रिता इदानीं सर्वेऽपि भारतीयाः वयं परानेवावलम्बमानाः सुखसागर इव निमग्नामात्मानमाकलयामः। मनागपि अनुध्यायतां चेतसि कीदृशी इदानीं वयं संवृत्ताः कीदृशी च प्रवृत्तिरस्माकं कुत्रेदानीमासक्तिः किमिदानीं शरणं कथं चैतदेवं संवृत्तमिति नूनमिदमव्यग्रेण मनसा विचार्य भवन्तः प्रतिपद्येरन् यत्स्यन्दना इव चक्राणी परेषामेव बलान्यवलम्बन्ते भारतीया इति । ........कोऽयं निरभिमानः ? किमिदमालस्यं केयं परावलम्बनता ? किमिदं दैन्यम् ? किमिदं कर्तव्यपराङ्मुखत्वम् ? न जानीमः कथमेतद् सहन्ते भवन्तः .......।

अहो कीदृशी भावोत्तेजकता विचारोज्ज्वलता क्रान्तिकान्तता निर्भीकता चास्मिन् वचनविन्यासे। सुतरां दुर्लभाऽन्यत्र कुत्रापि एतादृशी वाक्-प्रखरता स्वरभास्वरता भावातुरता च।

मार्गणीयोऽत्र सम्बन्धः संघर्षस्य। अस्ति किल उपनिवेशवादस्य प्रतिपक्षः राष्ट्रवादस्य कुतोऽयमात्मबलमासादयति ? किं संस्कृतमतिरिच्यान्यदपि सम्भवति तस्य साधनम् ? संस्कृतसाहित्यं विना किमन्यताऽप्यस्त्यधिगतिः राष्ट्रियचेतनाया इति प्रश्ना इतिवृत्तिमनुवर्तन्ते। राष्ट्रियचेतनां विना न सबलं सफलं चान्दोलनं

प्रभवेत्। राष्ट्रियभावना तावत् परम्पराबोधानुरोधिनी। आत्मगौरवगुर्वी साऽतीताख्यानव्याख्यानमपेक्षते । तच्च नूनं सम्पादयति संस्कृतम्। सर्वमितिवृत्तं पूर्वपुरुषाणां चास्माकं चित्रं चरित्रं तत्रैव सम्भृतम्। इदमेव प्रयोजनमुद्दिश्य 'सुनृतवादिनी' आत्मलाभं लभते। किं च यथा प्रतिज्ञातमादर्शसंख्यायां 'के वयम्', 'कुतोवयम्', 'केषां वयम्' इत्यादिकं संस्कृतभाषाभिज्ञानमत्रबोधियितुं सुनृतवादिनीं प्रकाशयिष्यामः' तदर्थं संस्कृतज्ञानां स्वापभङ्गोऽपेक्षते। सोऽपि संस्कृतरवेणैव सम्भवति। संस्कृतमेव भारते संस्कृतपण्डितानां भास्वरा भारती। सैव तान् प्रबोधयितुं सर्वथा समर्था। यथाह अप्पाशास्त्री– 'ये तु सन्ति देशभाषामयानि संवादपत्राणीति विफलमेव संस्कृतपत्रिकाणां प्रकाशनमित्याकलयन्ति न खलु तेषु प्रत्यवस्थाप्य परिश्रमप्रायो लेखनीयात्मीयम्। तदपि पुनर्न विस्मरणीयं यज्जीवयन्त्येवाद्यापि संस्कृतभाषैकजीवितास्तून्नतिकामुकाश्च पण्डिता भारतवर्षस्य तेषु तेषु प्रदेशेषु भूयांस इति ।' पण्डितानां तेषां प्रस्वापनिराकरणमावश्यकं मन्यमानः स बुध अवादीत् – 'गाढं स्वापमिवानुभवन्तां विस्मृतात्मचेतसां पुरुषाणां तथाविधप्रस्वापनिराकरणपुरः सरमात्मसामर्थ्यमवबोधप्रतिपत्तये मुहुर्मुहुः संचालनमेवावश्यकमिति न चैतन्य विदितं विज्ञानम्। अत एव य एवं चाजयेत्सः किल गरीयानेवोपकारक इति नो बुद्धिः। पराक्रम एव नराणां प्राणाः। विनष्टप्राये चास्मिन् विगतचैतन्या इव प्राणिनः।'

संस्कृतं तावद्राष्ट्रवादस्यापरः पर्यायः। राष्ट्रवादः उपनिवेशवादस्य धूमकेतुरिति नाङ्गलानामपि तिरोहितम्। तावदेव बिट्रिशशासनस्य जम्बूकारवः यावन्न जागर्ति पण्डित–पञ्चानन इति तु तेषां सुविदितमेवासीत । इयं राज्यव्यापिनी चिन्ता सर्वकारस्य वरिष्ठ प्रशासकस्य ऐलनह्यूम महोदयस्य प्रस्तुते परिपत्रे दरीदृश्यते। तत्र स गौराङ्कः भीषणामाशङ्कां प्रकटयति। जनविद्रोहाणां नेतृत्वं यदि संस्कृतज्ञानां करगतं भवेच्चैन्नूनं शक्तिं संकल्पनासादयेत्। असंगठिता असम्बद्धाश्च क्षुद्रा विरोधाः झटित्येव विपुले संगठिते राष्ट्रविद्रोहे परिणमयितुं नाल्पमपि कालं कलयिष्यन्ति। सर्वमेतद् ब्रिटिशशासनस्यानर्थाय भविष्यतीति। ह्यूमस्यायं सन्देहः संस्कृत पत्रकारितायाः चिरमेव सत्यापितः। आन्दोलनावसरेषु वसन्ते कुसुमकोरकानिव शतशः संस्कृतपत्रपत्रिका प्रादुरभवन्। ता सर्वे येन केनापि व्याजेन राष्ट्रवादमेव प्रचरन्ति प्रसारयन्ति च। प्रभूतानामेतेषां पत्राणां प्रभवस्य कारणमपि ब्रिटिशशासका एव। ते एकतः आङ्ग्लभाषां भारते राष्ट्रभाषात्वेन बलादारोपयन्ति। अपरतश्च घोषयन्ति संस्कृत मृतभाषेति। कथं स्याद् सुरभारत्याः मरणं सह्यं संस्कृतज्ञैः। तस्य प्रतिक्रियाया अप्ययं प्रभावो यो मुखरितोऽस्ति प्रतिपृष्ठं पत्रिकासु। यथा– 'प्रलपन्तु नामेदानीं केऽपि कूपमण्डूका निधनं गता भगवती देववाणीति। ये पुनः बङ्गेषु विलसन्तीं दाक्षिणात्येषु दीव्यन्तीं नेपालेषु नृत्यन्तीं राजस्थानेषु राजन्तीं विद्वद्वदनारविन्देषु विहरन्ती–मभिनवकविगणप्रदत्तकरावलम्बां पुनः प्ररूढयौवनामिव सर्वाङ्गसुन्दरीमेनां पश्यन्ति। कथं नाम ते स्वप्नेऽपि व्याहरेयुः पञ्चत्वं गता देवसरस्वतीति'– संस्कृतचन्द्रिका।[3]

'भारतश्रीः'[4] स्वप्रकाशन–प्रयोजनमेवं प्रकटयति–अर्जुनस्य प्रतिज्ञे द्वे न दैन्यं न पलायनमिति भारतीयरणरणकं पुनरपि भारतश्रीः प्रवर्धक मत्त्वा संस्कृतवाङमयस्य अचित्रापि विचित्रा परमरमणीया पत्रिका तदसौ भारतश्रीः कणेहत्य प्रकाषयितुमुपक्रान्ता यन्निखिलमपि भारतं भारतं सम्पादयेद् भवदीया भारतश्रीः' इति।

बङ्गस्य बहिष्करणान्दोलनं समर्थयन् तत्रत्यान् वीरान् वीराङ्गनाश्च प्रबोधयति सुनृतवादिन्यामप्पाशास्त्री– 'अयि जागृत बङ्गीयकुमार्य ! जागृता मा तावत्समर्थ्यतामात्मा निद्रायै अयि भगिन्यः । परित्यज्यतां स्वापः। प्रबुध्यध्वं

समाकर्णिततूर्यध्वनयश्च समागच्छत संभूयैकत्र । अयि वीरपत्न्यो वीरमातरः च । निराक्रियन्तां तावदमी प्रगाढश्यामलताः जलदाः। पाप्यन्तां स्तनन्धन्याः स्तन्यम्। सुदूरमुत्सार्य व्रीडा सह विलासेन सह च प्रणयेन। प्रस्कीर्यतां मधुरमधुरस्यात्मनः स्तन्यस्य समर्पणेन स्वदेशाभिमानं शिशूनाम्' इति।

दुर्लभोऽयं चेतनाचमत्कारः स्वदेशाभिमानभावः आत्मगौरवानुभूतिश्च। प्रशस्यते चेयं 'सुनृतवादिनी' तदानीन्तनीसु पत्रपत्रिकासु। सिंहस्येव तस्या गर्जनं ब्रिटिशशासनस्यापि हृदय प्रकाममकम्पयत्। प्रतिबन्धितं तस्याः प्रकाशनमुद्विग्नमानसेन ब्रिटिशशासनेन।

इदमत्रावधेयम्। संस्कृतपत्रिकाणां सम्पादका न केवलं शास्त्रज्ञाः, शस्त्रज्ञा अप्यासन्। ते विश्वसन्ति स्म 'शस्त्रेण रक्षिते राष्ट्रे शास्त्रचिन्ता प्रवर्तते' इति। दृश्यते व तेषामेकस्मिन् हस्ते लेखनी, अपरस्मिन् च शतघ्नी। शस्त्रक्रान्तिः विचारक्रान्तिमनुवर्तते। अप्रतिहता भवति विचाराणां शक्तिः। तस्या सञ्चारः संस्कृतपत्रकारितया कृतः। प्रायः संस्कृतपत्रिकाणां सम्पादकाः गरमदलस्याग्रेसराः बालगंगाधरतिलकस्य अनुगामिनः। तेषां परिषत् संस्कृतपत्रकारिताया 'तीब्राणां परिषत्' इति नाम्ना स्मर्यते।

अविस्मरणीयमस्ति योगदानं स्वातंत्र्यान्दोलनाय संस्कृतपत्रकारितायाः। 'वन्दे मातरम्', 'न दैन्यं न पलायनम्' सदृशा नादा अपि संस्कृतपत्रिकाभिरेव दिग्-दिगन्तरं नीताः। तिलकस्य 'स्वातन्त्र्यं मे जन्मसिद्धोऽधिकारः इति मंत्रबीजमपि संस्कृतपत्रकारितयैव जनमनःसु निवेशितं फलितं च स्वातन्त्र्यं सिद्ध्यति ।

**संदर्भ ग्रन्थ सूचीः**

1. दन्डी, का.द., सम्पा. चिन्मयीचट्टोपाध्यायः, पृ. 21
2. सूर्योदयः मासिकपत्रिकायाः आमुखपृष्ठः, वर्षम्-39, अङ्कः-6
3. संस्कृतचन्द्रिका - मासिकपत्रिका ।
4. 'भारतश्रीः' मासिऽकपत्रिका ।